श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ गीतार्थसङ्ग्रहम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ गीतार्थसङ्ग्रहम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

दृष्टार्थैकप्रचारे भुवन इह चतुर्वेदनिष्ठं सदर्थं
गृह्णीध्वं शिष्टसेव्यं श्रुतिशिखरगुरुं ये भजन्तेऽतिभक्त्या।
तेषां पादाम्बुजानि श्रयणपदमहो मे तथा योऽन्वगृह्णात्
गीतार्थं वेदचूडागुरुमणिरनघस्तत्पदाब्जे श्रयध्वम्॥

यो वाधर्मानुभोक्तुः प्रभुरपि जगतां सारथिः पाण्डवस्य
कर्मज्ञानोदिताया भवति पदजुषामेकलक्ष्यं च भक्तेः।
दुर्ज्ञेयाम्नायमौलिष्वधिगतपरमब्रह्मनारायणस्सः
श्रीमानेवोपयातस्स्वयमुभयविभूतीश इत्याह तस्मै॥ 1॥

बान्धव्यप्रीतिमन्तोऽप्युभयविरहितस्सन्त आसन् तदा वै
कारुण्यस्नेहयोस्स्वामिति मतिवहतोः मानसे धर्ममाने।
भीतेऽत्यन्तं प्रणम्य स्वचरणमयमाने च पार्थेऽथ तस्मै
तत्त्वं बोद्धुं स्मितास्यो गुरुमणिरुपयाति स्म नारायणस्सन्॥ 2॥

नश्यत्येव शरीरमन्तरुषितो जीवस्तु नाहं यथा
त्याज्यस्सङ्ग उपात्तकर्मनिकरो न त्याज्य एवाशु ते।
तस्मादात्मविबोधनस्मृतिततिर्जायेत मोहं त्यजे -
त्युक्त्वा तं विजयं विचित्रचरितः श्रीशस्समाश्वासयत्॥ 3॥

सारासारज्ञ एकश्चतुरमतिरिति ख्यातिपात्रार्जुनात्र
त्यक्त्वा सङ्गं समुद्यद्गुणकृतिमखिलां सत्त्वं आरोपय त्वम्।
सर्वाण्युक्तानि कर्माण्यपि मयि विनिवेश्यानि चेत्यब्रुवन् ये
सर्वत्र ज्ञानिनस्तेऽप्यतिशययशस श्चेति नाथो जगाद॥ 4॥

मायावी वेदजीवी वितरितुमपुनर्जन्मभावं मुकुन्दः
स्वाविर्भावानुभावान् स्वयमिह निखिलावर्ज्यकर्माणि चैव।
शुद्धज्ञानात्तशुद्धीन्यपि हतिरहितात्मस्थितिं लोकनिष्ठां
एवं प्रावेदयन्मे सुविशदमधुनाचार्यसम्प्रेक्षिताय॥ 5॥

आत्मालोके च शैघ्र्यं सुविदितसुकरोपात्तकर्मोदितं तत्
संसक्तस्तत्प्रकारेष्वधिकमपि मनः प्रापिकास्ताः क्रियाश्च।
दुष्प्रेक्ष्यात्मावलोकीकरणपरिकरज्ञानयोगप्रकारान्
रम्याया द्वारकाया अधिपतिरवदद्वासवस्यात्मजाय॥ 6॥

योगाभ्यासं प्रभेदांश्चतुर इह समानस्थितींश्चापि योगे
योगोपायांश्च योगादधिगतपरमार्थांश्च योगेषु तेषु।
स्वात्मोद्देशैकयोगं सकलजनहितं मुख्यतां योगनिष्ठां
वीराग्रण्ये त्ववोचद्धरमकुटभृते भोगिपर्यङ्कयोगी॥ 7॥

याथार्थ्यं स्वीयमात्मप्रकृतिनिरुपमाच्छादकत्वं च तां च
मायामात्मैकतार्यां समधिकचतुरात्मीयभक्तेषु तेषु।
ज्ञानी त्वात्मैव मे हीत्यसदृशमहिमोत्कर्षतां ज्ञानिनश्च
माध्वीपूर्णारुणश्रीचरण उपदिदेशात्र पार्थाय शौरिः॥ 8॥

ऐश्वर्यं चानलन्धीकरमखिलमलंबुद्धिपूर्णं फलं तत्
दुष्प्रापं चात्मसाक्षात्कृतिमदनुभवं वीतभूयोभवं च।
सेवास्स्वाङ्घ्र्योरधस्तादभिलषितसदासेवनेच्छानुरूपाः
श्रीमन्नारायणोऽस्मा अविजितविजयायाह सर्वानुकम्पी॥ 9॥

श्रीमानप्राकृतात्मा स्वयमतुलसमुत्कर्षमात्मावतारे
वैलक्षण्यं त्वनूनं धृतविविधतनौ प्रीतिमेतत्सुवित्सु।
भक्तिं त्यक्ताल्पकायत्रिदशपरिषदि स्वं प्रतीतं तदीयां
सर्वं चैवं नराय स्वपरहितपरः प्राह नारायणोऽस्मै ॥ **10** ॥

श्रीकारुण्येन भक्तिं निरवधिमुदयार्थं विवृद्ध्यर्थमस्याः
सौशील्यं च स्वकीयं निरवधिसुगुणापारभोग्यामृताब्धिम्।
सर्वामेतां विभूतिं निरवधिविभवामात्ममात्राधिनाथां
निस्सीमैश्वर्यशाली हरिरमरपतेर्व्याजहारात्मजाय ॥ **11** ॥

सर्वस्वं नायको नस्स्वतनुरिति लसत्तत्प्रकारं ब्रुवन् सन्
साक्षात्कर्तुं विभूतिं सपदि तदुदितां प्रार्थयामास धन्वी।
दत्वास्मै दिव्यचक्षुः किमुचितमितरत्साधनं वास्ति भक्तेः
साक्षात्कुर्वन्ति सन्तस्त्विति च सुविशदं प्राब्रवीत् वासुदेवः ॥ **12** ॥

भक्तिस्स्वाङ्घ्रिसमर्पिताऽऽशुफलदा ह्येषा विलम्बाक्षमा
तस्यास्साधनमेव भोग्यगुणिनो ध्यानं तदज्ञानिनाम्।
कैङ्कर्याणि लघुस्स्वकर्ममतिहीनानामुपायस्त्विति
श्रीशस्स्वीयपदप्रियप्रियतमः पार्थाय चोपादिशत् ॥ **13** ॥

देहानां च स्वरूपं श्रुतिशतविदितं जीवभेदं तथात्म -
प्रेप्सूनां ज्ञानलाभक्रममथ च फलं स्वात्मनो ज्ञानजस्य।
मूलं देहोपलब्धेः पृथगपि करणं चात्मनोऽन्तस्स्थमार्गं
पीयूषस्यन्दिपादो हरिरवगमयत् धन्विपार्थाय सम्यक् ॥ **14** ॥

बन्धुं त्रैगुण्यमेवाखिलपुरुषमिहानूनतः सम्प्रवृत्तं
कर्तुं त्रैगुण्यमेव प्रसृतवदखिलं दुष्कृतं बन्धमूलम्।
एवं त्रैगुण्यमायोत्तरणमपि गतीनां च दानाभिरक्षे
निस्त्रैगुण्योपकारी निजगद मकुटालङ्कृतायार्जुनाय ॥ **15** ॥

तत्त्वेभ्यस्त्र्यष्टकेभ्यस्तनुगतपुरुषेभ्योऽपि तन्मोहितेभ्यः
जिह्वाप्रोक्ताष्टवर्णैस्सहपरमपदप्रेप्सुविश्वासिपुम्भ्यः।
आदर्तव्यैः परव्योम्न्यपि विमलगुणैरष्टभिर्भासुरेभ्यः
व्यापी विक्रान्तलोको निजगद विजयाय स्वमन्यं विचित्रम्॥ **16**॥

ये स्वाज्ञापरिपालकास्सुकृतिनो देवा मतास्ते तथा
ये वा तद्विपरीतकर्मनिरतास्ते राक्षसा दुष्कृताः।
त्वं तावत् प्रभुशासनानुगगुणैश्वर्यः श्रुतीराश्रय
ग्राह्यं तत्त्वमदुः स्वकर्म विजयावेहीति कृष्णोऽब्रवीत्॥ **17**॥

वेदानुक्तानि कर्माण्यतिबलदितिजेभ्यो विभक्तानि तद्वत्
वेदोक्तां कर्मनिष्ठां दृढतरगुणतस्त्रीन् प्रकारांस्तदीयान्।
वेदोक्तायाश्च तस्यास्त्रिविधविभजने लक्षणं तत्प्रभावं
वेदोद्धारी मुरारिर्निजगद विशदं वासवस्यात्मजाय॥ **18**॥

सत्कर्मातिप्रियं मे तदिह यदि भवेत्सात्विकत्यागयुक्तं
सत्त्वानुष्ठाननिष्ठो यदपि विहितवानात्मलक्ष्यत्वतस्तत्।
सत्त्वानुष्ठानलभ्यं फलमपि शरणागत्यनुष्ठानमेवं
सत्वस्यैव प्रदाता ह्यतिशययशसे प्राह पार्थाय शौरिः॥ **19**॥

सङ्गोन्मूलौषधं हीत्यतिबलममुना मायिना शौरिणोक्तां
भोग्याम्भोधेरिवेमामतिमधुरसुधां सर्वदात्रीं च गीताम्।
भक्तेभ्यो ये प्रयच्छन्त्यथ च निशमयन्त्यादराद्वा पठन्ति
भ्राजन्ते धूतदुःखाम्बुधिगतविविधभ्रान्तयस्ते कृतार्थाः॥ **20**॥

निर्धूताखिलदोषमङ्गलगुणक्षीराब्धिपद्मासिनी -
वक्षोऽत्यद्भुतचेष्टितप्रियतमा गीता तदीयं हि तम्।
निर्दोषागममौलिदेशिकवरो भक्तिप्रपत्त्यर्थिनोः
सारार्थं सुखबोधधारणकृते सङ्गृह्य चान्वग्रहीत्॥ **21**॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्यामुनयोगिदर्शितपथे गीतार्थसङ्ग्राहकः
ग्रन्थश्श्रीनिगमान्तदेशिककृतो वर्वर्ति यो द्राविडः।
गोपालो गुरुराडनुग्रहफलः तत्सूक्तिलोलो मुदा
व्याख्यात् कन्नडभाषया च विबुधव्याहारतोऽश्लोकयत्॥

॥ इति गीतार्थसङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥